 ISSN : 2583-2271
Vol. - I, No. 1: 2021

# अभिनवमङ्गलदशकम्

**ड. गगनचन्द्रदे**

श्रीवात्स्यत्रितशाकलाश्शतबलाक्षोद्दालकौ सायणो
यास्काचार्यहिरण्यगर्भसुलभा माण्डव्यशांखायनौ।
आत्मानन्दगदाधरौ हरिहरश्श्रीमाधवो वेङ्कटः
सर्वे वेदविदः खलु प्रतिदिनं कुर्वन्तु वो मङ्गलम् ॥१॥
भारद्वाजसुनागभागुरिशिवा: कात्यायन: पाणिनि-
गार्ग्यगालववोपदेववरदाः स्फोटायनो वामनो।
रामानन्दजिनेन्द्रबुद्धिमलया नागेशचारायणौ
शाकल्यक्रमदीश्वरक्षपणकाः कुर्वन्तु वो मङ्गलम् ॥२॥
श्रीव्यासो रघुनाथजैमिनिमुनी गङ्गेशवात्सायनौ
श्रीवाचस्पतिवासुदेवकपिला निम्बार्करामानुजौ।
श्रीचैतन्यकणादगौतमबुधाश्श्रीशङ्करो वल्लभो
विद्याभूषणगौडपादमथुराः कुर्वन्तु वो मङ्गलम् ॥३॥
श्रीनागार्जुनदेवसूरिशवरा दिङ्नागवंशीधरौ
विद्यानन्दपतञ्जली मुनिवरौ श्रीहेमचन्द्रामितौ।
श्रीश्रीकण्ठगणेशमाठरवरात्रेयस्तथा मण्डनः
सर्वे दार्शनिका ननु प्रतिदिनं कुर्वन्तु वो मङ्गलम् ॥४॥
श्रीदक्षो रघुनन्दनात्रिलिखिताश्शङ्खो वशिष्ठाङ्गिरौ
श्रीबौधायनयाज्ञवल्क्यविदुरा हारीतवैखानसौ।
आपस्तम्भबृहस्पती यममनू संवर्त्तशातातपौ
नीतिज्ञा निखिला सुनीतिसहिताः कुर्वन्तु वो मङ्गलम् ॥५॥
श्रीनारायणवर्धमानचरका दीपङ्करः सुश्रुतः
कृष्णात्रेयगणेशमाधवकरा गोविन्ददामोदरौ।
श्रीस्वच्छन्दसुषेणनिश्चलकरा वाग्भट्टविद्यापती
प्रख्याताः खलु वैद्यशास्त्रनिपुणाः कुर्वन्तु वो मङ्गलम् ॥६॥
श्रीविश्वेश्वरविश्वनाथमुकुला: क्षेमेन्द्रविद्याधरौ
श्रीदण्डीजयदेवभोजभरताश्शोभाकरो मम्मटो।
भोजो भामहराजशेखरजगन्नाथोद्भटा रुद्रटः
सर्वे काव्यविदः सुकाव्यसहिताः कुर्वन्तु वो मङ्गलम् ॥७॥
श्रीवाल्मीकिहलायुधौ हरिहरो रत्नाकरो विल्हणः
कृष्णानन्दधनेश्वरौ जयरथः सोमेश्वरो भारविः।
भट्टिश्रीधरकालिदासविनया माघाश्वघोषौ पुनः

ISSN : 2583-2271
Vol. - I, No. 1: 2021

निःशेषे ननु काव्यशास्त्रकुशलाः कुर्वन्तु वो मङ्गलम् ॥८॥
श्रीक्षेमीश्वरशूद्रकौ च हनुमान् श्रीभट्टनारायणः
श्रीहर्षो भवभूतिभाससुभटा बोधायनो भीमटः।
प्रह्लादश्च विशाखदत्तमुरारी दिङ्नागदामोदरौ
सर्वे नाट्यविशारदाः प्रतिदिनं कुर्वन्तु वो मङ्गलम् ॥९॥
श्रीकौटिल्यसदाशिवौ च यवनाचार्यश्च लीलावती
श्रीपूर्घश्च पराशरो मुनिवरो गर्गार्यभट्टौ पुनः।
सत्याचार्यपृथू वराहमिहिरः श्रीभास्करश्रीधरौ
सर्वे भारतविश्रुता बुधवराः कुर्वन्तु वो मङ्गलम् ॥१०॥